No. ४६ ख

Title लक्षणावली

Author वीरवल्लभः

Extent ८ पत्र Age सं-१८३२

Subject ~~व्याकरण~~ न्याय

सहस्रनामावली

॥ ५६॥

ध ८१८९

नं. ४६८
लक्षणावली
पृष्ठ पत्राणि
कागज
सं १५३२

लक्षणावली श्लो० १४५ प० ८

१ ॥ॐ श्रीगणेशाय नमः ॥ अथ लक्षणम् लिख्यते ॥ ननु गणेशत्वं नाम किम् ॥ विघ्नविनाशानुकूल
व्यापारविशिष्टत्वम् गणेशत्वम् ॥ वा एकत्वसंख्यावच्छिन्नरदनविशिष्टत्वं गणेशत्वम् ॥ २ करीन्द्र
आनन विशिष्टत्वे सति मनुष्य वर्तमानवशरीरविशिष्टत्वं वा गणेशत्वम् ३ इभमस्तक विशिष्टत्वे सति
गजेन्द्रभिन्नत्वं वा गणेशत्वम् ४ गिरिजाशरीरजन्य मलनिरूपित जनकतासंबंध विशिष्टत्वं वा ग
णेशत्वम् ५ नंदिकेश्वरादि प्रसिद्ध गण निष्ठाधिपतित्वादि विशिष्टत्वं वा गणेशत्वम् ६ ननु कौ
मुदीत्वं नाम किम् ॥ माङ्गलिक श्लोकाव्यवहितोत्तर शिवप्रणीत प्रत्याहार प्रयोजक चतुर्दशसू
त्र घटितत्वे सति प्रकृतिप्रत्यय विभागपूर्वक संहिताप्रयोजक पद सिद्धि प्रकाशक सूत्र वृत्ति कारा
दि घटित वाक्य समुदायत्वं कौमुदीत्वम् ॥ ७ ॥ ननु सूत्रत्वं नाम किं ॥ अल्पाक्षरत्वे सति बह्वर्थ
बोधकत्वं सूत्रत्वम् ॥ ८ ॥ इति चेन्न ॥ वक्तव्यम् ॥ ९ हरिशब्दे प्राप्ति व्याप्तेरल्पाक्षर विशिष्टत्वे
शिव १

॥ कथं ॥ हरिर्ब्रह्मा हरिर्विष्णु हरिर्देव महेश्वरः ॥ इत्यादि वचनात् ॥ अथवा अल्पाक्षर विशिष्टत्वपूर्वक
वृत्ति परिच्छेदकत्वे सति बह्वर्थ बोधकत्वं सूत्रत्वं ॥ १० ॥ इति चेन्न ॥ अइउण् इत्यादावव्याप्तेर्वृत्ति परिच्छे
दकत्वाऽभावात् ॥ ११ ॥ अथवा अष्टाध्यायीपठितत्वं वा सूत्रत्वम् ॥ १२ ॥ इति चेन्न वक्तव्यम् ॥ वेदान्त
गौतम सूत्राणां सूत्रत्वं न स्यात् कथं अष्टाध्यायी पठितत्वाभावात् ॥ १३ ॥ अथवा संज्ञा परिभाषा
विधि नियमातिदेशाधिकार षट्कान्यतमत्वं वा सूत्रत्वं ॥ १४ ॥ तन्न यथा घटत्व ज्ञानाभावे अयं नी
लो घट अयं पीतो घट इत्यादि ज्ञाना संभवात् तथा सूत्रस्य ज्ञानाभावे संज्ञा परिभाषा सूत्र भेद
ज्ञानाभावात् १५ अथवा पाणिनि निर्मितत्वं सूत्रत्वं तन्न वेदान्त सूत्राणां पाणिनि निर्मितत्वा
भावात् ॥ १७ ॥ अथवा पूर्वकालिक फणीशकृत भाष्य चरीकृत वृत्ति विशिष्टत्वं वा सूत्रत्वं ॥
॥ १८ ॥ तन्न गौतम सूत्रे फणीशकृत भाष्याभावात् ॥ १९ ॥ अथवा ॥ भाष्य वृत्ति विशिष्टत्वं

तर्हि गीताया अपि सूत्रत्वापत्तिः शंकरकृत भाष्यविशिष्टत्वात् ॥२१॥ तस्मात् सूत्रस्य किं लक्षणं ॥
२ अल्पाक्षरविशिष्टत्वे बह्वर्थबोधकपूर्वकालिकभाष्यविरहसंयुक्ते सति तच्छास्त्रमूलभूतत्वं सूत्र
त्वम् २२ ॥ ननु वृत्तित्वं नाम किम् ॥ विशदसूत्राधिकारित्वीभूतत्वं वृत्तित्वं ॥ २३॥ तत्र विशदसू
२ त्रार्थाधिकरणमनोरमायामपि सत्वात् अथवा अन्यसूत्रकृत्पदविशिष्टत्वे सति सूत्रार्थवि
रूपकत्वं वृत्तित्वं तत्र उपदेशेऽजनुनासिक इत् इति सूत्रवृत्तावन्यपदाकर्षणाभावात् २६
र= अथवा सूत्रान्तराधिकारान्तरनिरूपितसूत्रार्थविवरणशालिनी वृत्तिः २७ तत्र पाणिन्योपि
सूत्रवृत्तावल्पाक्षरत्वात् २८ अथवा सूत्रतात्पर्यार्थनिरूपकत्वं वृत्तित्वम् २९ तत्र सूत्रतात्पर्या
र्थनिरूपणस्य तत्त्वबोधिन्यामपि सत्वात् ३० अथवा वृत्तिकारनिर्मितत्वं वृत्तित्वं ३१ तत्र एत्ये
धत्यूठ्स्विति सूत्रोपरि वृत्तिकृतव्याख्याने मनोरमैव चेतरेव विशेषणं नत्वेधतेरप्यभिमतेचारात् नाप्यूठः

ना। ९जाद्योरे=१

असंभवादिति वृत्तिकारः इत्याव्याख्यानस्यापि वृत्तित्वापत्तेः वृत्तिकारनिर्मितत्वात् ३२ अथवाऽस १
धातुप्रयोगघटितत्वं वा वृत्तित्वं ३३ तत्र तस्मिन्निति सूत्रवृत्तौ वा स धातोः प्रयोगाभावात् ३४ किं ना
म वृत्तित्वं ॥ सूत्रार्थाधिकरणत्वपूर्वकतात्पर्यार्थानायकत्वविशिष्टत्वे सति वृत्तिकारनिर्मितत्वं ए
वं वनातिव्याप्तिः तत्त्वबोधिन्याः सूत्रार्थाधिकरणत्वे सत्यपि वृत्तिकारनिर्मितत्वाभावात् ॥ नापि वृ
त्तिकारात् प्रतिपादिते त्येधत्यूठ्सु याख्यानेऽतिव्याप्तिः तत्र वृत्तिकारनिर्मितत्वेपि सूत्रतात्पर्यार्था
नायकत्वाभावात् ३५ न च तस्यापि सूत्रतात्पर्यार्थानायकत्वमेव कौमुद्यधिकरणसूत्रार्थावि
शिष्टत्वपूर्वकतात्पर्यार्थानायकत्वविशिष्टत्वे सति वृत्तिकारनिर्मितत्वं वृत्तित्वम् ३६ संज्ञात्वं ना
म किम् ॥ सांकेतिकपदजन्यबोधनानुकूलव्यापारवती संज्ञा ३७ ननु प्रत्याहारत्वं नाम किम् ॥
वर्णसंज्ञोपाधिकरणताविशिष्टत्वं प्रत्याहारत्वं ३८ इति चेन्न ॥ अकारादिष्वतिव्याप्तेः तत्रा

[illegible]

१=२

तर्हि किं नाम प्रत्याहारत्वं ३९ हल्वीत्यव्रणेग्राहणविशिष्टादिरंत्येनेतिसूत्रप्रतिपादितत्वं प्रत्या
३ हारत्वं ॥४०॥ संकेतत्वं च नाम किम् ॥ ततकृष्णजीयाचार्यैः पक्षिवर्ज्जधर्मसंहितानामेतिक
थनं संकेतः ४१ शक्तित्वं नाम किम् ॥ अस्मात्पदादयमर्थो बोधव्य इति संकेतः शक्तिः ४२
3 संधित्वं च नाम किम् ॥ सूत्रार्थाधिकरणकविधेयतावच्छिन्नत्वे सति हलजधिकरणकै
कद्वित्वबहुत्वसंख्यावच्छिन्नवर्णानां परवर्णसंयोगानुकूलो व्यापारः संधिः ४३ उप
सर्गत्वं नाम किं ॥ धातुसंयोगोत्तरकालिकस्वार्थबोधनानुकूलव्यापारसंधिविशिष्ट
त्वमुपसर्गत्वम् ॥४४॥ यद्वा ॥ धात्वधिकरणकस्वसंयोगोत्तरकालिकधात्वर्थबोधक
तावच्छेदकत्वमुपसर्गत्वम् ॥४५ किमवच्छेदकत्वं ॥ तत्पदार्थेतरभिन्नत्वमवच्छेदकत्वम् ४६
किमवच्छिन्नं ॥ तत्पदार्थविशिष्टत्वमवच्छिन्नत्वम् ४७ ननु शब्दत्वं नाम किम् ॥ प्रकृ

शिव: ३

इति चेन्न ॥ संज्ञाशब्देषु प्रकृतिप्रत्ययविभागेनोन्नीयमानार्थस्याजागरूकताया स्वीयमानत्वात् ॥४८
कोशादिगृहीतशक्त्या प्रकृतिप्रत्यययोरेकार्थीभावेनवा लौकिकार्थजनकतावच्छेदकीभू
तत्वम् शब्दत्वम् ॥५०॥ तत्र चतुर्विधः शब्दः ॥ यौगिकः । योगरूढः । रूढः । यौगिकला । क्षणि
कश्चेति ॥५१॥ अवयवशक्त्यार्थबोधनानुकूलव्यापारविशिष्टत्वं यौगिकत्वम् ॥ यथा उमकमादिः ॥
इू=५ ॥५२॥ धातुप्रत्ययजन्यव्युत्पत्तिसंभूतार्थसंभवविशिष्टत्वे सति कोशजनितार्थपरत्वं योगरूढत्वम्
॥ यथा पंकजादिः ॥५३॥ केवलकोशगृहीतशक्तिपरत्वं रूढत्वं ॥ यथा कुक्कुटादिः ५४ अवयवार्थ
मि= कोशजनितार्थोभयविशिष्टत्वं यौढिकत्वं ॥५५॥ यथा मण्डपादिः ॥ मण्डपोस्त्रीजनाश्रयेत्य
मरः ॥५५॥ संशक्यसंबन्धविशिष्टत्वे सति अन्यार्थधीजनकतावच्छेदकीभूतत्वं लाक्षणिक
त्वम् ॥ यथा गंगायां घोषः ॥५६॥ तत्र वैयाकरणानां मते शब्दविषये अष्टौ स्फोटाः संति ॥ वर्ण

४

वाक्यस्फोटः। पदस्फोटः ॥ इति त्रयो व्युक्तिस्फोटाः वर्णजातिवाचिकेतिपक्षे वर्णपदवाक्यभेदे त्रयजातिस्फोटः वर्णपदस्फोटः वाक्यपदस्फोटश्चेत्यष्टौ स्फोटाः ॥ ५७ ॥ यथा राम इत्यत्र रकारमकाराकार

व=३ वर्णा वाचका वर्णस्फोटः ॥ राम इति पदमेकं वाचकं जातिपदस्फोटः ५८ रामं मां पाहीति वाक्यमेव वाचकमिवाक्यस्फोटः तत्रव्यक्तिस्फोटवाचकानां मते वर्णपदवाक्यव्यक्तिरेव वाचिका जातिवाचकानां मते वर्णपदत्ववाक्यत्वजातिरेव वाचिका ६१ केषांचिन्मते राम इत्यत्र वर्णानामपि पदस्यापि वाचिकत्वम् तत्र वर्णपदस्फोटः रामं मां पाहीति वाक्ये पदवाक्ययोर्वाचकमिति वाक्यस्फोटः ॥ ६३ ॥ अर्थवत्वं नाम किम् ॥ प्रकृतिप्रत्यययोरेकार्थीभावेन लोकेऽर्थविषयकबोधजनकत्वमर्थवत्वम् ॥ किं नाम प्रातिपदिकत्वम् ॥ अव्युत्पन्नाधिकरणकधातुप्रत्ययान्तता नव च्छिन्नार्थकतावच्छिन्नशब्दाधिकरणकप्रवर्तमानत्वम् प्रातिपदिकत्वम् ॥ यद्वा व्युत्पत्तिपन्नाधिकर

शा॰ कृ॰ ४

किं प्रत्ययत्वं ॥ प्रकृतिसंयोगेन स्वार्थबोधकत्वं प्रत्ययत्वम् ॥ का प्रकृतिः ॥ प्रत्ययपूर्ववर्तिनी प्रकृतिः ॥ ६८ ॥ किं तावल्लिंगत्वं ॥ लिंगानुशासनादिनिर्मितत्वं लिङ्गत्वम् ६९ स्तनकेशवती स्त्री स्यात् लोमशः पुरुषः स्मृतः इति प्राचीनलक्षणं दूषितः प्रायं कुतः अचेतनखट्वादिषु स्तनकेशत्वाभावात् किंजलकादिषु लोमसत्वाभावाच्च ७० ॥ ननु लकारत्वं नाम किम् ॥ कर्तृकर्माद्यर्थविधीयमानत्वं लकारत्वम् इति लक्षणं वैमवद्यतमं कुतः कृदंतिकप्रत्यया नामपि हे तदर्थे संजायमानत्वात् ॥ ७२ ॥ कृदंतप्रत्ययभिन्नत्वे सति वर्तमानाद्यर्थे लः कर्मणीति सूत्रेण धातुभ्यः संजायमानत्वं लकारत्वम् ॥ ७३ ॥ ननु धातुत्वं नाम किम् ॥ गणपठितत्वे सति क्रियावाचकत्वं धातुत्वं ७४ न च गणपठितत्वं धातुत्वम् ७५ तर्हि सर्वशब्दस्यापि धातुत्वं ७६ न च भ्वादिधातुपाठाधिकरणदशगणपठितत्वं धातुत्वम् ॥ ७७ सर्वशब्दस्य गणपठितताभावात् नैवं वाच्यं पुत्रीयतीत्यादि नामधातूनां न स्यात् क्रियावाचकत्वेऽपि गणपठितताभावात् कंड्वादीनां चाधातु

नच गणपठितत्वं धातुत्वमितिलक्षणं तु दूषितमेव ८२ गणपठितत्वं धातुत्वमित्यनेन लक्षणेन सर्वशब्दस्यापि धातु
त्वे सति को दोषः सर्वशब्दाल्लडादिप्रसंगात् ८२ न च प्रातिपदिकसंज्ञाया धातुसंज्ञया बाधः परत्वाद्धातुसंज्ञा
यैव तद्बाधात् ८३ इति चेन्न अदसः सर्वेषामितिज्ञापकात् प्रातिपदिकसंज्ञैव बाधः एवमपि न अगतित्वग
तितत्वात् यायास्यसीत्यादावातो धातोरित्याकारलोपः प्रसंगात् ८४ न च स्यादर्थमिति तक पाठायो व कि
रंगासिद्धत्वं नाजानंतर्यमिति निषेधात् ८५ न च लक्षणप्रतिपदोक्तपरिभाषया न दोषः तस्या धा
तुषडारक्ते ८६ न च वार्तिककारमते आतो नाप इति वर्तते गर्भः सत्वात् तथापि पाणिनिविरोधा
त् यथोत्तरं मुनीनां प्रामाण्यमित्युक्तत्वात् सुगादार्तिकं बलीयः इति वा इति अस्ये पि प्रसंगस्तथा च
विकल्पार्थको वातीति प्रयोगः स्यात् तत्र लक्षणप्रतिपदोक्तपरिभाषायाश्च प्रवृत्तेः ॥ ८८ ॥ न च ग
तिगंधनाद्यर्थनिर्देशो नियमात् तस्य भीमसेनादिपरीडतकृतत्वेन प्रमाणाभावात् भाष्ये

किं चान्योन्याश्रयदोषः कथम् ॥ धातुबोधं विना क्रियात्वबोधाभावात् क्रियात्वबोधाभावे धातुत्वज्ञानाभावः ॥ प
रस्पराकांक्षीत्यापतावच्छेदकीभूतत्वे सति परस्परबोधप्रतिबंधकतावच्छेदकीभूतत्वमन्योन्याश्रयत्वम् ॥ न
चान्योन्याश्रयो गुण यथा तव ममाश्रयो मम तवाश्रय इति तथापि शास्त्रे दोष एव यथा तद्विज्ञातरि बु
इति तथा शास्त्रविघातः स्यात् ९० न च फलव्यापारवाचकत्वमेव धातुं तत्राप्यन्योन्याश्रयत्वात् दूषणा
दारस्तु भाष्ये स्पष्टीतः ९१ न च क्रियावाचकत्वं धातुत्वमित्येवास्तु तर्हि हिरुक्पृथग्वर्जनेत्यादावति व्या
प्तिः स्यात् वर्जनादिरूपक्रियावाचकत्वात् ॥ अतो यथोक्तमेव लक्षणं साधीयः ९२ व्यापारत्वं ना
म किं ॥ साध्यत्वेनाविधीयमानत्वं व्यापारत्वम् ॥ क्रिया का साध्यत्वेनाभिधीयमानत्वं क्रियात्वं ९४
किं फलं ॥ व्यापारजन्यत्वं ~~फले~~ फलत्वं ॥ ९५ ॥ अकर्मकत्वं च नाम किम् ॥ फलव्यापारयोरेका
धिकरणवृत्तित्वमकर्मकत्वम् ९६ सकर्मकत्वं च नाम किम् ॥ फलव्यापारयोर्भिन्नाधि

६

शाब्दबोधत्वं नाम किम् ॥ शब्दार्थाधीनजनकतावच्छेदकीभूतत्वं शाब्दबोधत्वम् ९८ कारकत्वं नाम किम् ॥ विभक्तिद्वारा
क्रियाजनकत्वं कारकत्वम् ॥ कर्तृत्वं नाम किम् ॥ सर्वकारकप्रयोजकत्वे सति धातूपात्तव्यापाराश्रयत्वं कर्तृत्वं १००
कर्मत्वं च नाम किम् ॥ धातूपात्तफलाश्रयत्वं कर्मत्वं १०१ करणत्वञ्च नाम किम् ॥ यदनंतरमव्यवधानेन फ
लोत्पत्तिस्तत्करणत्वम् १०२ संप्रदानत्वं च नाम किम् ॥ कर्त्रभीष्टत्वे सति कर्तृप्रयोजितदानग्रहणानुकू
लव्यापारविशिष्टत्वं संप्रदानत्वं १०३ अपादानत्वं च नाम किम् ॥ धातूपात्तगत्यनाविशिष्टत्वे सति त
ज्जन्यविभागाश्रयत्वमपादानत्वम् १०४ अधिकरणत्वं च नाम किम् ॥ कर्तृकर्मद्वारा तन्निष्ठक्रि
याधारभूतत्वमधिकरणत्वम् १०५ समासत्वं च नाम किम् ॥ अनेकपदानामेकपदीभवनानु
कूलो व्यापारः समासः ॥ स च षड्विधः ॥ अव्ययीभावत्वं च नाम किम् ॥ पूर्वपदार्थप्रधानोऽव्ययी
भावः ॥१०७॥ तत्पुरुषत्वं च नाम किम् ॥ उत्तरपदार्थप्रधानस्तत्पुरुषः १०८ द्वन्द्वत्वं च नाम

बहुव्रीहित्वं च नाम किम् ॥ अन्यपदार्थप्रधानो बहुव्रीहिः ॥ कर्मधारयत्वं च नाम किम् ॥ तत्पुरुष
स्समानाधिकरणः कर्मधारयः १११ द्विगुत्वं च नाम किम् ॥ संख्यापूर्वो द्विगुः ॥११२॥ तद्धित
भावस्य किं लक्षणम् ॥ एकत्वविशिष्टत्वे सत्यनेकपदानि बह्वधिकरणकवृत्त्यमान्यता
समवेतत्वं तद्धितोद्भवत्तलादिप्रत्ययनिरूपितबोधकताशक्तिसंजनितबोध्यतावच्छिन्नतत्ता
दर्थिकभावत्वम् ॥११३॥ तद्धितोद्भवकर्मणः किं लक्षणम् ॥ प्रकृतिजन्यबोधे प्रकारो
भावः ११४ तद्धितत्वं च नाम किम् ॥ ततत्तस्मै पदसाधनाय हित इति तद्धितः ॥ इति श्री
मद्गिरावल्लभपार्वतीयविरचिते लक्षणावलिः समाप्तः ॥ शुभमस्तु ॥ सं. १९३२
ज्ये. प्र. १७ ॥ श्रीरामम् ॥ श्री । श्री । श्री । श्री । श्री ॥

६

शिव।

नं ४६

जायमानोहरेद्दारान् वर्द्धमानो हरेद्धनं । म्रि(?)यमाणो हरेत्प्राणान् नास्ति पुत्रसमो रिपुः १ चतुर्द्द

द्यान्मनो दद्याद्दद्याचं दद्यात्सुभाषिताम् उत्थाय चासनं दद्यादेषो ऽ धर्मस्सनातनः २ विद्या

८ हवै ब्राह्मणमाजगाम गोपाय मां सेवधिस्तेहमस्मि असूयकायानृजवे शठाय न मां ब्रूया

वीर्यवती यथा स्याम् ३ धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा तत्र विद्या न

वक्तव्या शुभं बीजमिवोषरे ४



८